१६४

विरोधोक्तिलगुम्फः

गोविन्दगोपिका १-११६

२ ३४०

१९५

पत्रसं० ८२-८

२२७

॥ श्रीगणेशाय नमः ॥ ईश्वरं हरिं वरदाद्रिशेखरं कमलालयापतिं दयानिधिं सकलार्थिजनार्थि
तप्रदं भजे मामिह शरणागतिहारिणं १ कृत्वा न चेद्यनिगमांतमहांतमार्गं निराकृतं येन मयं कृतीनां
प्रतारिता नाम बहुश्रुतैस्तं रामानुजं योगिनमाश्रयामः २ अशेषेत्यादि श्लोकद्वयेन शारीरिक
शास्त्रविषयसमाहारार्थं श्रोतृणां तत्सिद्ध्यर्थं च स्मृत्याचारप्राप्तस्वेष्टस्य मंगलमाचरति श्रोतृबु
द्धिसमाधानार्थमाशीः प्रतिपाद्यसंक्षेपश्च क्रियते तत्रेष्टदेवतोपासनारूपमंगलाचारः स्वपक्षस्था
पनारूपप्रतिपाद्यसंक्षेपश्चोत्तरश्लोकेन क्रियते प्रथमश्लोकेन स्वपक्षे प्रतिपाद्यमुपायोपेया च
त्मकं तत्र प्रकृतिसिद्धरूपमुपेयं चतुर्थ्यंतैः पदैरुच्यते नमः शब्देनोपाय उच्यते तत्रोपेयस्वरूपस्य दः
उभयविभूतियोगित्वं शेषिणे शेषशायिने इत्युच्यते निर्मलेत्यादिपदेनोभयलिंगत्वमुच्यते तत्र विभूतिद्वैविध्य प
स्य तत्त्वमसीति वाक्यस्यार्थनिष्कर्षेण मुखेन लीलाविभूतियोगित्वमुच्यते अशेषचिदचिद्वस्तुशे
षिण इति प्रथमपदेन तत्र ब्रह्मणः सर्वसामानाधिकरण्यं शरीरशरीरिभावनिबंधनं शरीरत्वं च
चेतनं प्रत्यनन्यार्हशेषत्वं तावत्सामानाधिकरण्यस्य शरीरशरीरिभावनिबंधनत्वे सति प्रकृति
स्ववाक्य भिर्यैः कृष्णेति श्रिया स्याद्विरोधः अशेषपदेन चेतनवस्तुशेषीयति कृतिपदचेतननियंतृत्वा

अनंतेति

पदानोऽद्वयोगात् नैर्मल्यं हेयप्रत्यनीकत्वं निखिलस्वमनुकूलत्वं च परिच्छिन्नेषु केषुचिदात्मसु नवस्तुष
प्यस्तीति तद्व्यावृत्त्यर्थं सकलेतरपरित्यागपूर्वकं प्राप्यत्वादिसिद्ध्यर्थं च तदुपायोपायानंत्यमाह अनं
तश्चेति अनेन वाऽनन्तत्वनिर्देशस्युक्तिरूपार्थगुणनिषेधपरिहारश्चाभिप्रेतः कल्याणगुणानुकूलत्वा
२ च्चिदानंदत्वानंदाभिप्रायी नहि प्रतिकूलेऽपि हेयेषु कल्याणगुणयोगः यथाऽनुकूलत्वे दर्शीयत्वात् सर्वे
गुणाः कल्याणगुणत्वाभ्यां निर्मलकल्याणगुणाभ्यां सामान्यविशेषाभ्यां ष्ठैर्गणबलीरदेनयायाभिप्रेतो निषिद्ध भ्यां
श्चेन गुणगुणीभावो विवक्षितः अनेनानंदो ब्रह्मेत्यादिषानंदशब्दस्यानंदिवाचित्वं सिद्धमेवेत्यभिप्रेतं
आनंदं ब्रह्मणो विद्वानिति व्यतिरेकनिर्देशात् एवं हेयप्रत्यनीकत्वकल्याणगुणाकरत्वरूपोभयलिं
गत्वं ब्रह्मणस्तत्कं विष्णुशब्दाधर्मिनिर्देशः अनेन शेषित्वमंतर्यामित्वपर्यंतं विस्फोरितं रूपत्वादेवता
विशेषमितीयश्च एवं चतुर्थ्यंतैः पदैः स्वरूपस्तु निरूपितं अथोपायं सूचयति नमः इति मन्मना भव म
द्भक्तो मद्याजी मां नमस्कुरु इत्यत्र नमस्कारशब्दस्य प्रतिपदं तस्मन्वयेन नमस्यायामनुत्तत्वं तनीवान् ध्यानार्थेनश्च
णमावृत्तिरिति हि वक्तव्ये एवं देवतोपासनरूपमंगलाचारः श्रौतः कृतः प्रतिपाद्यस्वपक्षस्थापनसंक्षेप
श्वार्थीकृतः अथ द्वितीयेन गुरूपासनरूपमंगलाचारः श्रौतः क्रियते आर्थीः प्रतिपाद्यपरपक्षनिरासंक्षे

वृत्तिस्थानेन सिध्यति वस्तुतस्तु न परमार्थत्वं विरहितं अतोऽत्र वस्तुतोऽखिलं तस्य तावत्त्वं किमर्थं
चिदचिद्वस्तुनो नास्तीति चेत् उच्यते यावद्व्यवहारमतः सर्वमपि चेतनमेव न च घटादेश्चेतनत्वानति
व्यक्तिमात्रमेवेति न विदचिद्भिन्नाग इति तद्वा वृत्तिः चिदचिच्छब्दाभ्यां। किंच माध्यमते जीवब्रह्मणोः
सामानाधिकरण्यं स्वस्यैक्यनिबंधनं अचिद्ब्रह्मणोः कथं बाधार्थ इति सामानाधिकरण्यस्यानेकत्व
मा बोधार्थ इति न व्याहृतिः स्यात् इत्येता किंचैकत्वमते जीवब्रह्मणोर्भेदपक्ष औपाधिकभेदविषयाः अ
चित् ब्रह्मणोर्भेदपक्षे तदः स्वाभाविकभेदविषया इति नेदृक् सर्वोऽनेकरूपोऽनुपपन्न इति तद्वा
वृत्तिस्थानिवेशता निवेशितवत्कथं श्रीकारस्य मंगलार्थत्वात् अतो येनोक्तं एवं लीलाविभूति
विशिष्टब्रह्मोक्तं भवति नित्यविभूतियोगमाह शेषशाय्यर्थिन इति शेषः शङ्खः पत्नीपरिजनादेः
उद्देशार्थः तस्य नित्यस्य योनत्वात् भोगविभूतिसंबंधस्य स्वाभाविकतया नित्यत्वमभिप्रेतं ए
वमुभयविभूतिविशिष्टब्रह्मोक्तं अथोभयलिंगत्वमाह निर्मलानंदकल्याणनिधये इति निर्म
लानंदश्च कल्याणनिधिश्चेति निर्मलानंदकल्याणनिधिः निर्गुणं निरंजनं निरवद्यं अपहत
पाप्मा समस्तहेयरहितं विज्ञानमयं परमं पदं स्यादिति ब्रह्मणि विशेषणत्वेन निर्दोषत्वादिवाचि

मित्यादि पदेन भास्करमतोपन्यासः । एतत् द्वयं सिद्धमिति केचित् तदानीमप्रस्तुतस्यास्य द्वित्यपि ज्ञाता
इ स्तुमस्य वक्तव्यत्वानुपपत्तेः ततोपि पक्षत्रयोपन्यास इति निर्वाहो दूरं कस्यचिन्मतस्यापि ग्रन्थे सिद्धत्वात् स्ववा
न्तरविभागस्य कल्पनत्वोपपत्तेः इति भावः पक्षत्रयोपन्यासपरः अथ तन्निरासः संक्षेपः श्रुतिन्यायापेत
3 मिति श्रुतिः वेदः तदनुग्राहकस्तर्को न्यायः तन्मतसाधकं तर्कानुगृहीतं प्रमाणं नास्तीत्यर्थः यद्वा श्रु
तिन्यायापेतं तन्मतं प्रमाणतर्कविरुद्धं बाधकतर्कानुगृहीतप्रमाणमस्तीति भावः तन्निरासे किं कार
णमित्यत आह जगतीति वितथमिति श्रुतिन्यायापेतमिति प्रसिद्धत्वान्न तन्निरासे यत्नः कार्यः इति चेत् तत्रा
मोह हं तमिदं तमः इति तमः यथार्थज्ञानावरणं मोहनं अपरमार्थे परमार्थधी हेतुः अपास्तं दूरितं उत्सारि
तमित्यर्थः परमतनिरासः संहितादि तोगुरुत्यासनमुक्तं जयति तीर्थो रामइतिवत् संहिविज
यतादस्तुतं अनेन व्याकरणोक्तार्थस्य संदर्भिकत्वमुक्तं भवति एवमादौ स्वपक्षस्थापने परपक्षप्रति प
क्षेप संक्षेपं कुर्वता देवतागुरूपासनरूपो नमः चिंतमंगलं श्रीलमाचरितं भवति तथा सर्वैरनुष्ठितं न
मस्कृत्य हृषीकेशं नमो भगवते तस्मै व्यासायेत्यादिषु तथा च श्रुतिः यस्य देवे इत्यादि अथ प्रथमश्लो
कार्थमीषद्विस्तरेण वदन् प्राक् तनिकमर्थं स प्रमाणकं प्रतिजानीते अतोषजगाद्धितेत्यादिना प्र

पक्षः क्रियते तत्र पूर्वार्द्धेन परपक्षोपन्याससंक्षेपः उत्तरार्द्धेन तन्निराससंक्षेपः परं ब्रह्मैवेत्यादि परं हेयप्र
त्यनीकत्वकल्याणगुणाकरत्वाभ्यां सर्वविलक्षणं एवकारो विरोधं स्फोरयति संश्रितदुरितापरत्वेन तदिष्फ
२६ लत्वेन तच्च यदाश्रयणीयं तदेव अज्ञानपरवशं चेत्को मोक्षक इति भावः अयं अविद्यातिरोहितस्वरूपं अन्त
एवंतत्र सर्वपरिगतं विविधभेददर्शनशालि संसरति भेददर्शनकृतजन्मजरामरणादिसांसारिकदुःखभागी
स्यादिति एवं शंकरमतमुपन्यस्तं अथ भास्करमतमुपन्यस्यते तत्परोपाध्यालीढं परब्रह्मैवोपाधिकृतनिरपेक्षं।
स्वत एव शुद्धं तत् ब्रह्म व्यतिरिक्तत्वमुच्यते परानुपगतमिथ्याभूताविद्यानादित्वं च विवक्षितं आलीढं संबद्धं वि
वशं कर्मपरवशं अथ यादवप्रकाशमतं अशुभस्यास्पदमिति अचिदंशत परिणामार्हता रूपास्तु भस्यचिदंशा
शुभस्यार्थयोग्यतारूपास्तु भस्य चास्पदमित्यर्थः जीवब्रह्मणोर्भेदस्य स्वाभाविकत्वाभ्युपगमात् न ब्रह्मणस्तु स्वा
र्थीन्वय इति विशेषमं इदं अभेदस्यापि स्वाभाविकत्वाभ्युपगमे नाशुभाश्रयत्वादिति भावः अचिद्ब्रह्मणोर्भेदा
भेदौ स्वाभाविकौ चिद्ब्रह्मणोस्तु भेद एव स्वाभाविकः भेदस्त्वौपाधिकः मुक्तौ च भेदवचनादिति भास्करमतं चिद्
ब्रह्मणोरपि भेदाभेदौ स्वाभाविकौ मुक्तौ भेदस्यापि निर्देशादिति यादवप्रकाशमतं तस्मादुक्त एवार्थः तत्राशुभस्या

स्यास्पदमिति पादेन यादवप्रकाशमतोपन्यासः परं ब्रह्मैवेत्यादिपादेन भास्करमतोपन्यासः तत्परोपाध्यालीढ

इत्न् प्रतिज्ञातस्यार्थस्य शरीरमाह· जीवेत्यादिना याथात्म्यशब्देन तत्त्वमसीतिवाक्ये त्वंपदस्यचैतन्यस्याभिव्यं
४ क्तचित् ऐतदात्म्यमिदं सर्वं तत्सत्यमितिपरमात्मकत्वं सत्यं चोक्तं तस्माद्याथात्म्यशब्दस्यायमेवाभिप्रायः ज्ञा
नत्वैकशब्देन वाक्यार्थज्ञानमात्रस्यानुपायत्वं सूचितं वर्णाश्रमधर्मेतिकर्तव्यताकशब्देन कर्मणो विहि दि
ता साधनत्वं सत्कुलेश्यवादक्रयाचलिनो परमपुरुषपदेन श्रेयस्त्वे यद्वस्तु नीकलंकल्याणगुणाकरत्वाभ्यां
4 सर्वेशित्वशरणत्वे दैवतानि विशेषत्वं चोक्तं तमेवं विद्वान् नान्यः पंथा इति श्रीपुरुषसूक्तानुरोधात् चरणयुगलश
ब्देन स्वामिनिदासानुगुणस्थितिर्दर्शिता सर्वदाचरणद्वंद्वं भजामीत्यादिवचनानुगुण्यात् ध्यानार्चनप्रणामा
दिरित्यादिशब्देन सततं कीर्तयंतो मामित्यादिक्तं कीर्तनयत्नादयोविवक्षिताः ध्यानार्चनप्रणामकीर्तनय
त्नादयः सर्वेउपायशरीरांतर्गताः वर्णाश्रमधर्माः प्रयाजादिस्थानीया· आद्येत्यादिष्वद्वंद्वस्थाने ध्यानार्चनप्र न
णमादिः ध्यानं मानसं नामसंकीर्तनं वाचिकं अर्चनादि कायिकं त्रकर्म यद्यपि तत्र ध्यानस्यप्राधान्यमि
तरापेक्षया तथापितत्क्रियाकरूपपरभक्त्यपेक्षयार्चनादितुल्यव्यवहारः एवं त्रिविधमुपासनं यथा मन्म
ना भव मद्भक्तो मद्याजी मां नमस्कुरु सततं कीर्तयंतो मां यतंतश्च दृढव्रताः स्मरणं कीर्तनं विष्णोः श्रवणं
पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणेत्यादि· मद्याजी ।

ति

यतेनित्यमिति श्रुत्यभिसिद्धेन स्कन्तिशास्त्रेन वेदस्यापौरुषेयत्वाभिव्यक्तिरीश्वरत्वमभिधेयं निकरशास्त्रेनाभि
धायमानकृत्स्नशास्त्रार्थपर्यालोचनं विवक्षितं तत्राप्यनन्यपरत्वागसिद्धेऽतिदृष्टार्थेषु हि रः शास्त्रः। व
क्ष्यमाणाभिप्रायेणायमर्थः इत्युक्तं समधिगतसम्यग् धियां नः अनधीतव्याकरणानां वराणां प्रतिपादकेवि
हासपुराणादिभिः सहार्थगत इत्यर्थः जगतो मिथ्यात्वाज्ञानवद् निर्गतोपायपराः अनयः अपितु निर्विशे
षब्रह्मज्ञानस्यैव मोक्षोपायत्वप्रतिपादनपरा इति शंकां नुदस्यति अत्रोच्यते जगद्धितानुशासनेति जगद्धित
वेदस्य ज्ञापनप्रवृत्तस्य सर्वमेवम्नांते जगतिप्रत्यवायाय नवयातम्नांतरोत्पादकत्वमनुपपन्नमित्यभिप्रायः हितमुपा
च योपेयात्मकं अनुशासनं विधिं ज्ञापनं अनुपूर्वः शास्तिः विधिमज्ञापनार्थो दृष्ट इति शाब्दाः अत्रोपायग्रहणेन ३१
सर्वाधिकारिगणउच्यते हितानुशासनपरो वेदः कथं स्वर्गादिपुरुषार्थं बोधयतीति चेत् तत्तदधिकारिविशे
षापेक्षया पुरुषार्थत्वमस्तीति तद्बोधनं नहि हिंसेनेनाभिचरन् यजेतेति कथं पापहेतुकर्मत्वं नाहितं कर्मविद
धातीति चेत् उच्यते तत्र [illegible] वैध्यविशेषैर्लानिवारणं वशीकर्तुं यन्त्रादेव ब्राह्मणादिहिंसकादिदुष्टनिग्रहार्थं
त्वेन तस्य च हिततमत्वमिति यदा अभिचारादिकर्मणि ध्यन्तनत्फलप्रदत्वरूपभगवदैश्वर्यविशेषज्ञा
पनेन तदभिधायिशास्त्रस्य हितपरत्वमिति [illegible] ब्रह्मनोपायस्यापि संक्षेपेण सूचितत्वात् विस्तरेण ब्रा

वत्वानुष्ठीयते उच्यते यथात्मनो देहादिविलक्षणत्वाद्देहात्मज्ञानमविद्या तद्वत्वाच्यापं क्रियते एवमात्मनो
२ भगवच्छेषत्वात्स्वतंत्रात्मज्ञानमप्यविद्या तन्मूलस्वर्गादिफलदकर्मानुष्ठानमपि तिद्युण्यस्याविद्यासंचितत्वोप
पत्तिरिति देहात्माभिमानि मिरजडत्वादिधर्मकश्चात्मनि जडत्वाद्यारोपवत् नयवदात्मकश्चात्मनि स्वत
न्त्रिते स्वनिष्ठत्वारोपणं व्रातिरेकत्वाविद्यैव हि सा एवं चित्रकर्मप्रवाहहेतुकस्वानुविधदेहप्रवेशः तत्कृतत
त्तद्देहेष्वात्माभिमानः अनात्मन्येवात्माभिमानीयच्छियाकर्म। कर्मणा च शरीरप्रवेशः तच्छरीरसंबंधेनाविद्ये
तिप्रवाहानादिता। तेनावर्जनीयं भवभयं जन्ममरणादिभयं मित्येतिसहस्रकृत्वउक्तौ वर्णयितुं निवर्त्यि-
तुमशक्यमित्यभिप्रायेणावर्जनीयमित्युक्तं तद्विद्धं सनातयेति एवं निवर्त्यमुक्तं अत्र अन्यजनकमारोप
पादनेन प्रतीतिमप्रसिद्धत्वाभावात् दृष्टान्तानिवर्त्यमिति सिद्धांदेहातिरिक्तात्मस्वरूपतत्स्वभावेति
नात्र स्वरूपं ज्ञानैकलक्षणं स्वभावो भगवच्छेषत्वं उपासकत्वानुगुणो स्वरूपस्वभावो जीवस्योक्तो नदंतर्या
मिपरमात्मस्वरूपस्वभावेति तदंतर्यामिशब्देन जीवस्य परमात्मपर्यंतत्वेन तद्वाचित्वात्स्य परमात्मप
र्यंतत्वं सिद्धं परमात्मस्वरूपमीशितृत्वं स्वभावः प्रणतसौलभ्यं उपास्यत्वानुगुणो स्वरूपस्वभावावी
श्वरस्योक्तौ। एवं सिद्धरूपमुपेयमुक्तं तदुपासनप्राप्तेनोपायउक्तः सर्वविद्धतद्विनाशविरुक्तः।

भ्रष्टर्चनपरः वेदनध्यानादिभ्राष्टैरन्यत्र मोक्षाच्यर्चनश्रवणमादिसहितसोपायत्वंन्यायसमुत्पन्नस्त्रसमुक्षत्तसि
द्धं तत्र सामान्यविशेषन्यायाद्वेदनादिश्राष्टानांध्यानादिपरत्वसिद्धिवत् समुत्पन्नगृहीतत्वादर्चनश्रवणमादिसा
हितध्यानपरत्वसिद्धिरित्यर्थः तस्मात् ध्यानार्चनश्रवणमादिः सर्वोप्युपेयविरोधिनिरासकः अस्पष्टप्रियइति ध्या
नार्चनश्रवणमादिः सर्वोप्यनुष्ठीतिपूर्वकः कार्यः मन्मना भवेत्यादिवचनेमन्ज्ञोमन्मनाभवमन्ज्ञेमद्या
जीभवेति इतिपदं मन्मभक्तयज्ञान्वयादितिभावः एवंप्रथमश्लोकसंक्षिप्तमुपाय स्वरूपंविस्तृतं उपेयमा
ह- तस्यापि फलेइति। अथमर्थइत्यर्थश्राष्टस्यविशेषणत्वानुलिङ्गमा पूर्वमुपायस्यापि संक्षिप्तत्वेनविव
रणत्वादस्मिन्श्लोके उपायप्रधाननिर्देशः उपेयेनिविशेषप्रधिमात्रंनिवर्त्यं मिथ्यारूपमविद्यादिकं उपा
योर्थो स्वार्थज्ञानमात्रंनहि मिथ्यासर्पोगरुडध्याननिवर्त्यः अपितु नायं सर्पइतिविज्ञानमात्रनिवर्त्यः तस्मा
न्नत्र हेतुत्वं सोपायत्वेत्यत्राह असेति परमात्मैक्यानुपपत्तयेनविरुद्धस्वभावत्वयाष्टत्वहेतुत्वमुच्यते अ
सेतिपदेन अनादिश्राष्टेनान्योन्याश्रयः परिहृतः अविद्या ष्टपत्नां चाप्यविद्याया स्वरूपं कुलनंदन अ
नात्मन्यात्मबुद्धिर्या अस्वेस्वमितियामतिः इत्युक्तप्रकाराविद्यामिश्चेत्ता तयासंचितं अविद्यासंचितंकर्मेति
हि स्मृतिः उक्तेपणाद्विपात् सर्वेयुत्पयापश्रावः कर्मप्रपञ्चविद्यासंचितत्वं तद्विदेहापि रिकाम्य ज्ञान

ति

न्नाह देवमनुष्यादिप्रकृतिपरिणामविशेषरूपेति प्रकृतिपरिणामसंबंधेनो विशेषः प्रकृतिपारत

६ मविशेषः स्वरूपः नानाविधत्वादेव वाह्यो देवमनुष्यादिश्चान्तरभेदो दुःखित्वाद्यान्तरभेदश्च विचित्रि

तः ज्ञानानंदैकगुणकर्मित्वेन निर्वाणमयप्रायमात्मा ज्ञानमयोऽमलः दुःखाज्ञानमलायमीः प्र

कृतेस्तेन चात्मनः स्वस्यार्थोऽभिधेयः ज्ञानानंदविशेषगुणकं ज्ञानत्वानंदत्वादिगुणकं वा न तु ज्ञान मात्र

6 स्वरूपं कथं देवादिभेदप्राप्तिरित्यत्र [illegible] तत्रात्तु मात्रागमे स्तथाहि प्रवृत्तिपत्तिरिति

शंकायां प्रत्यक्षादीनि शरीरसंसृष्टात्मविषयाणि निष्कृष्टात्मविषयाणि तु वाक्यानि भेदप्राप्तिरित्यत्र

दंतीति वक्तव्ये भेदशंकां च परिहरति तस्येति श्रुत्यादेरत्रमात्मस्वरूपनिरूपणानि च [illegible] वचांसि

व्याख्यातानि भवंति तस्येति ज्ञानानंदैकस्वरूपत्वेऽविशिष्टेऽपि एतस्येति शरीरसंबंधोपाधिभेदः क

र्मकृतदेवादिभेदैः प्रत्यक्षत्वेनैकस्वरूपभेदो हि वाह्यकर्मनिमित्तः देवादिभेदे प्रत्यक्षेना प्र

स्यावरणे हि संस्पर्शाद्विविक्तो भवति स्वरूपभेदो वाचामगोचरः स्वसंवेद्यत्वेन प्रत्यक्षाभि

भवति तभेदमित्याह वचनेनास्यार्थः एकस्वरूपेति ग्रंथस्यायमर्थः ज्ञानानंदैकस्वरूपस्यात्मनः बुद्धिसुखा

द्यान्तरभेदः संसारहेतुकर्मजन्यशरीर[illegible]हेतुकः देवादिशरीरभेदेनेष्टस्तत्रात्मनोऽभेदश्च

उपेयस्य ज्ञानस्य कारणत्वाच्चेतस्य फलभूतेत्या दिना ज्ञापन इत्यादि ज्ञापनशब्देन पूर्वोक्तानुसन्धानशब्दार्थः स्प-
ष्टः वेदान्तवाक्यजातशब्देनैकवाक्यतामापन्नयथोक्तं चनेनाभ्युदयं ज्ञात्वानुमतज्ञापनइतिनिर्देशेन वेदान्तवाक्या-
नामनुसन्धीयमानकार्यप्रधानत्वशंकां व्याहृत्य उक्तार्थविषयाणि तानि वाक्यान्याह तत्त्वमसीति षष्ठे प्र-
मात्यर्थलिंगोपेतत्वात् प्रथममुक्तं तत्र जीवविशिष्टस्य ब्रह्मणस्तादात्म्यप्रतिपादनमिति विजातीयमात्रस्य ब्रह्मात्मक-
त्वपरं वाक्यमाह अयमात्मा ब्रह्मेति अथ पदं कस्मिन्नित्याह य आत्मनीति देवतापि विशेषनिर्णयार्थमा-
ह एष इति उपासनस्य वर्णाश्रमधर्मेतिकर्तव्यताकत्वप्रमाणमाह तमेव विदित्वेति उपासनमेवोपायइ-
त्यत्र प्रमाणमाहोपायनिर्णयार्थमाह ब्रह्मवेदेति ब्रह्मविद् ब्रह्मोपासकः पुरुषः उपास्यां तदनिषेधमा-
ह तमेवं विदित्वेति आदिशब्देनोपासनस्य विधवाक्यानि गृह्यन्ते यस्माच्च विवक्षितानाः प्रमुखवाक्येषु जीवपरमा-
त्मनोः स्वरूपं कथं भवति पृथग्भिन्नत्वाकांक्षायामुपबृंहणानुगृहीतं शक्ति प्रतिपन्नं तयोः स्वरूपं विव-
रन् प्रथमं जीवात्मस्वरूपमाह जीवात्मेति वर्णाश्रमाद्युक्तेसंगाद्देहमानादि इषितः भजते ज्ञानस्व-
८ तान् धर्मान् स्वस्य योग्यान् सोऽयं उभाभ्यामेवैष शरीरेण पशुर्विचयाद्यः शरीराकृति भेदभिन्नमूर्तेत्यनेकर्मयो-
न्यादयः स्यादिसुप्रकृतिसंगाद्देवादिशरीरसंबाद्धयेनेकरूपं देहेनात्मानं तु मन्यवाकोऽकं करोतीति

तं द्वयोर्वी समस्तवस्तुविलक्षणस्वरूपत्वम् अत्र स्वरूपशब्देन विशेष्योऽशेषविशेषणः उपास्यत्वप्राप्यत्वो
७ पयोगिगुणजातमभिप्रायेणाह अनवधिकातिशयासंख्येयकल्याणगुण इति सद्गुणात्मा हि साधार
णशब्दैर्भगवन्नारायणपुरुषोत्तमाद्यसाधारणशब्दैः कण्ठोक्तम् अभिधीयत इत्याह सर्वात्मेत्यादिना भग
वच्छब्देन हेयप्रत्यनीकत्वं च कल्याणगुणैकतानत्वं च विवक्षितं नारायणशब्देनोभयविभूतिमत्त्वं पुरु
षोत्तमशब्देन विभूतिभूतचिदचिद्विलक्षणं इत्यन्तर्यामिस्वरूपमित्युक्तं भवतीत्यर्थः अयं भेदश्रुत्य
7 र्थ उक्तः अयं चाभेदश्रुतिविरुद्ध इति शङ्कायां तदैकार्थ्यमुपपादयति अस्यैवेत्यादिना अस्य भेदश्रुतिरपि
पन्नस्यैवमवगतिर्यादृ नयतः श्रुतय इति भेदश्रुत्यानुगुण्याद् उक्तं श्रुत्यैकार्थ्यात् सामानाधिकरण्य
स्याभासाभेदश्रुतयोऽपि तद्वैभववगतिपादकाः इत्यभिप्रायः सामानाधिकरण्यवाक्यस्य तद्वैभवप्रतिपाद ए
कत्वं कथमित्यत आह सर्वत्रेत्यादिना अन्तर्यामिणः परमात्मनः तदेकनियाम्यत्वेन तत्तच्छरीरत्वात्
शरीरिणः शब्दाः शरीरिपर्यन्तमभिदधतीति सामानाधिकरण्यवाक्यमिति तदवच्छिन्ननिमित्तपदेषु अधिकरणत्वा
मे दौश्च तद्वैभवत्वेन प्रतिपादयन्तीति सर्वश्रुतीनामैकार्थ्यमित्यर्थः नियमनेन प्रतिपादयन्तीत्यन्वयः परस्य ब्रह्म
णः शक्तिरूपे तदखिलं जगत् विष्णोरंशो हि जोऽनन्तः विष्णोरेता विभूतयः परस्य ब्रह्मणो रूपं जगत्सर्वं

वरणो हि सः देवादिशरीरभेद आवरणः तस्मात्तन्नाशे न कश्चन भेदो नाम निर्विषयत्वादित्यर्थः नास्त्यावर
णमिति पाठे त्वर्थः स्पष्टः प्रत्यस्तमितभेदमिति ग्रन्थे त्वयमर्थः प्रत्यस्तमितदेवमनुष्यादिभेदं सत्तामात्रं ननु
भेद जन्मादिविकाररहितं अतएव अगोचरं वचसां देवादिवचसां जायतइत्यपाद्वि वचसामगोचरं तु कथ्या
द्वारथमाह तत्संवेद्यमिति तच्च स्वरूपबोधमेव श्रवणं ब्रह्मशब्दाभिलप्यमित्यर्थः संसाररक्षायां योग्य ज्ञानं तच्च
व्यवहारः तद्गोचरं चेत् ज्ञानमात्रमपि तदानीं व्यवहाराय ज्ञानस्वरूपमपि व्यपि न च वक्तुं शक्यं यदि शक्यं त
र्हि देवादिव्यवहारस्य शक्यत्वमत आह ज्ञानस्वरूपमेवेति नाव देवनिर्देश्यमिति तर्हि औपाधिकाकारामे। दे।
विध्यते न वाचि शब्दगोचरमिति स्वाभाविकरूपवाचि शब्दगोचरमित्यर्थः सर्वशब्दागोचरं चेद्वचसामप्यगोचर
मिति न शक्यते वक्तुमिति भावः तच्च सर्वेषामात्मनां समानमित्युक्तेनपुमाने को भवत्स्थित इत्येक शङ्को
भावस्यात्मो भवति तत्रतः समचाले विकार्येसात्मसंहितमुक्तये निर्दोषं हि समं ब्रह्मेत्यादि वचनाच्च अथात्मयो
मिस्वरूपमाह एवं विधेति समस्तेत्यादि जीवस्वरूपस्य च देवादिशरीरस्य च संबन्धनत्वादेवं विधेत्युक्तं य
द्वा स्वस्य समापासिद्ध तयोक्तं उज्ज्वलेत्यादिना जगत्कारणात्मनो सपर दलेन उक्ते स्वेतरवैलक्षण्ये तृणा
देरप्यस्तीति न व्याप्त्यर्थं शोधकवाक्योक्तो भगवल्लिङ्गत्वेन वैलक्षण्यमुच्यते समस्तेत्यादिना कल्याणगुणाश्र

यत्रभेदः स्वाभाविक इति वर्णयंस्तस्याभिप्रायः तत्रापि सगुणत्वांगीकारमाह स्वाभाविकेति अपरिमितत्वेऽ
संख्येयत्वे उत्तर उत्कृष्टः प्रशस्तः नास्ति यो गुणसागरो गुणगणो यस्येति बहुव्रीहिः जीवगताचिन्त्यगुणास्य
दत्वमाह सुरनरेति विस्पष्टं तत्रेत्यादिना द्वितीयश्लोकोक्तशरदीत्यंपरंपरस्येत्यादेः संग्रहं विवृणोति अस्य
भेद र्थस्य यथालोचनपरा इति पर्यालोचनं परितः आलोचनं अभेदघटकसमानाधिकरण्यश्रुतितत्पौर्वापर्यालोच
नपरा न त्वेकवाक्यमात्रतत्पराः इत्यर्थः उदाहरंति भगवत्यामुनाचार्या इति शेषः तत्र प्रथमं तत्त्वमसीति वाक्यस्य
8 निर्विशेषपरत्वे अनेकदूषणानि वक्ष्यन् पूर्वं तच्छब्दावगत गुणजातमाह प्रकृत इत्यादिना प्रकृतपरामर्शी
ति यदंहे तु गर्भे तच्छब्दो गुणविशिष्टवाची प्रकृतपरामर्शित्वादित्यर्थः कथं गुणानां प्रकृतत्वमित्यत्राह स
संकल्पेति आदिशब्देनानुप्रवेशनामरूपव्याकरणादयो गृह्यंते जगदुदयविभवल[illegible]प्रलयाणां एवं तत्र दय
ब्राकप्रतिपन्नत्याविशेष्यं तदैक्षत बहुस्यामित्यादिभिः पदैः प्रतिपादितास्तस्यैतेन तच्छब्दकरणाधीनत्वगुण उक्ताः सर्वज्ञ
त्वादेस्तन्यायेन प्रकरणांतरात् कृष्यमाण गुणानाह तत्संबंधिनयेति कारणवाक्यसंबंधिनयानुप्रकरणांतरोक्ता
गुणा गृह्यंते सर्वज्ञ इत्यादिना यः सर्वज्ञः सर्ववित् परास्य शक्तिर्विविधैव श्रूयते स ईश्वरोऽस्य जगतो नित्यमेव।
नान्यो हेतुर्विद्यत ईशनाय तत्त्वसमभ्यधिकश्च दृश्यते सत्यकामः सत्यसंकल्पः यस्य सर्वमिदं विना

सजीवं चेतनं तच्छरीरकं जीवः अत्र यथा मृणालादिभिर्गजाधर्षितं तज्ज्ञानः स्यादित्यत्राह तच्छरीरं केभिरिति न व्यवस्थि
तमिति इदं शरीरं सजीवं तत् तच्छरीरको जीवो ज्ञानवानिति तन्निश्चेतुमशक्यमित्यर्थः शिष्याचार्ययोर्वचनं यान्या
नयत्कं त्वस्माच्छ्लाघ्यस्य च प्रमाणत्वात् ज्ञानव्यतिरिक्तं सत्यं स्यादित्यत्राह आचार्येति प्रमाणाश्रोत्वाचि वहितः
एकैकमेव निरपेक्षं इत्यमिति ज्ञापनायमिथ्याग्रहान्वितः चरित्रे तीतिवर्णाश्रमेष्वपि चार्थदोषं च वि ति
वहितं अथ द्वितीयश्लोकमर्थोर्थस्थं भास्करमतीयन्यासं संग्रहं च विवृणोति अपरइत्यादिना विवरणे च्छसो
त्यनुवर्त्तते अपरे व्यवस्थिता इत्यन्वयः प्रमाणसिद्धस्य ब्रह्मयायोगात्सगुणत्वे हेतुरनुपपन्नमित्याह अयहत्तया
पात्वादीति स्वतो यहतपाभत्वादियुक्तमपि एवोपदेशान्नथानुपपत्त्यापाधिसंबंधोप्यनुपपन्न इत्याह ते
भेदेति ऐक्यार्थवाक्यैर्न व्यवस्थिता इत्यन्वयः केनचिद्देवमनुष्यादिरूपाधेः नतमेन तथा भेदे सति बंधमोक्षव्यव पृ
स्थाप्यनुपपन्न इत्याह बध्यते मुच्यते चेति बध्यते संसरति एवं जीवत्वं ब्रह्मणः इत्यर्थः अथ याचि परिणाममाह
नानाविधेति मतरूपत्रयो हि यस्य स्वरूपत्वपरः अथ यादवप्रकाशमतं संग्रहं विवृणोति अन्ये तु नरित्यादिना ऐक्या
(वबोधवाक्यानां च सर्वेषां च सुपालंभः यथावित् ब्रह्मणो सुणोऽज्ञेरुक्रमेकरूपं प्रतिपन्नं तथा भेदोप्ये
करूपः प्रतिपन्न इति अथ ब्रह्मणोर्भेदस्य सामाधिकत्वे जीवब्रह्मणोर्भेदस्यापाधिककत्वे च न वाच्यं उभ

धीत्यन्वयः निर्विशेषज्ञानमात्रमेव ब्रह्मेति मात्रशब्देनं कश्चिद्विशेषो जडत्वमाहरति कार्त्स्न्येन ज्ञानमित्यर्थः स यथा
सैंधवघनः इत्यादिश्रुतिवाक्यार्थोऽभिप्रेतः यद्वा निर्विशेषशब्देन श्रौतनिषेधोऽभिप्रेतः तेन ज्ञानं ज्ञेयस्वरूपविशेषगु
णरूपविशेषशून्यमिति सिद्धं भवति ज्ञानशब्देन ज्ञानस्वरूपतोऽस्यार्थगुणनिषेधोऽभिप्रेतः ज्ञानस्वरूपस्यैव ज्ञा
तृत्वं ज्ञेयत्वं च सिद्धान्तिनोऽभिमतं अतः न व्याहत्यर्थं न दृष्टे दृष्टारं यस्यामतं तस्य मतमित्याद्युक्तं ज्ञातृत्वज्ञे
यत्वनिषेधाभिप्रायो मात्रशब्दः एवकारेण सविशेषत्वप्रतिपादकवाक्यानामतत्त्वावेदकत्वमभिप्रेतं त
याथात्म्याज्ञानपूर्वको बंधः स्वप्रकाशे वस्तुनि न संभवतीति शंकां निरस्यमुक्तमेवेत्याह नित्येति वस्तुनोनि
9 त्यमुक्त स्वप्रकाशमपि जीवैक्यस्य सामानाधिकरण्यवाक्यावगतत्वात् ब्रह्मैव अविद्यातिरोहितं भेदम्भ
मनुभवतीति कल्प्य अत एव बंधमोक्षोपपत्तिः इत्यर्थः जीवैक्यं श्रुतिसिद्धमभ्युपगतं चेच्छ्रुतिसिद्ध
भेदश्रुतिनामादिनैवाभ्युपगंतव्य इत्यत आह- निर्विशेषेति अद्वैतवाक्यबलेन तेषां वाक्यानां मिथ्याविषय
त्वमाश्रयणीयमित्यर्थः एवमुक्तव्यवस्थासिद्ध्यर्थमात्मभेदोऽप्यभ्युपगंतव्य इत्यत आह कर्म्मादिति बद्धमुक्तव्य
वस्थाश्रुतिसिद्धत्वादंगीकार्या बद्धमुक्तादयोऽमुक्ताहीत्यत आह- इतः पूर्वमिति चेष्टादिभिः सर्वशरीराणामात्म
वत्वं सिद्धं तथा सति सुखदुःखादिभावव्यवस्थाया वा नास्तित्वेनैव व्यवस्थाप्यमानेत्यत आहः एकमेव शरीरं
गो

रीरं ते तत्सर्वं वै हरेस्तनुः तानि सर्वाणि तद्वपुरित्यादिषु शरीरशब्दादिशब्दानां श्रेयोऽन्यः तच्छक्तिमदंशो
स्यादिनाऽशक्तिपदं तच्छब्दयोगाद्वह्निरेकैकस्मिन् रूपेऽस्य हेतुत्वाभिप्रायेण यद्वायं परमात्मा नेव तिष्ठते तच्छ
गच्छरीरमुच्यते तमेव प्रतिपदे तच्छ्रुणच्छक्तिरंश इति चोच्यते अत एव पितृत्वपुत्रत्ववच भक्तिसंबंधे भेदाद्विरोधो
दुर्वचः अतः शरीरादिशब्दानामेकार्थपरत्वेनाविरोधेनाप्येशरीशब्दानुगुणं शक्त्यादिशब्दानामर्थावर्णनी
शरीरी यः अंतरो यमयतीति लक्षणपूर्वकं शरीरिभावस्य मुख्यत्वयोक्तत्वात् कार्योपयोगिविशेषणत्वाच्छक्तिः विशि
ष्टभूषणविशेषणतया एकदेशत्वादंशः नियाम्यतया विभूतिः व्याप्यत्वे सति नियाम्यत्वाच्छरीरं अतः सर्वथा
मैकार्थमिति अभिप्रायः शरीरतनुशब्दोपादानेऽदृष्टांताभिप्रायेण कृतं शरीरतनुशब्दयोरिव शक्त्यादिशब्दाना
इति भावः मविरोधो वर्णनीयः एवं प्रथमश्लोकार्थं दर्शितं अथ द्वितीयश्लोकस्य पूर्वार्धस्य परपक्षद्वयोपन्यासपर
त्वार्थं क्रमाद्विवरिष्यन् प्रथमं माध्यमिकसंग्रहं विवृणोति तस्यैव भवेत्यादिना तस्यैवाभिमतिपरं द्वयस्यायमभि
प्रायः तस्य भेदस्फूर्तिरिति समस्तचिदचिद्वस्तुविलक्षणतया प्रतिपन्नस्य ब्रह्मणः एषां भेदस्फूर्त्यानुगुण्यात्सा
मानाधिकरण्यस्वाभाव्याद्दूरकल्पत्वैकार्थ्यात्तदैक्यभवप्रतिपादनपराणां भित्तिभावः अथादिशब्देन घटकश्रु
तयो विवक्षिताः भेदनिषेधकश्रुतयो वा तेषां विवरणोऽयं श्लोकः केचनेत्यनेन विरोधः स्फोरितः केवलं वर्णीयं

मं दृश्यत्वादीनि शोधकवाक्यानि निर्विशेषपराणीत्यभिप्रायेणाह सत्यं ज्ञानमिति सत्यादिपदानां निर्वि
शेषपरत्वे प्रवृत्तिनिमित्तभेदाभावात् सामानाधिकरण्यलक्षणहानिरित्यत आह· सर्वविशेषप्रत्यनीके
ति प्रवृत्तियोग्यविशेषाः प्रवृत्तिनिमित्तानीत्यर्थः नहि तथा कृत्स्नरूपधर्माः स्युरित्यत आह एकाकारतेति
ति आकारशब्दः स्वरूपवाची स्वरूपमेवाकारो यस्येति भावः निर्विशेषवस्तुपरत्वे पदानां पर्यायत्वं स्या
10. दिति पर्यायत्वशंकां परिहरति नचेति कुत इत्यत आह· एकत्वेपीति अर्थैकत्वात् प्रयोजनभेदत्वात् अर्थसि
द्धांतमाह नैतदेवमिति एकविज्ञानेन सर्वविज्ञानं च किमेकं ज्ञाने तज्ज्ञानं तद्यदेकत्वपक्षे किमेकविज्ञाने
न सर्वविज्ञाने सर्वस्याभावादुच्यते उतैकस्य सर्वस्य तादात्म्यादिति विकल्पमभिप्रेत्य प्रथमं दूषयति एकेति ५
एकेत्यादि स्पष्टं नसेत्स्यतीति सर्वशब्दस्य सर्वाभाववाचित्वाभावादिति भावः द्वितीयं दूषयति· सत्यमिथ्या
द्वयोरेकत्वासंभवाच्चेति जगतः सत्यत्वं ब्रह्मणोपि मिथ्यात्वमित्यर्थः द्वित्वपक्षेपि एकविज्ञानेन सर्ववि ज्ञानं
स्थालीपुलाकन्यायेन सर्वस्यैकसाधर्म्याद्वा स्यात् तत्र नाद्येन युक्तं कार्यस्यासत्वात् एकैकधर्म्याद्वा स्या
त् देवदत्तज्ञानाधान्यज्ञानेनेतरे सामग्र्यानतया ज्ञातत्वात् नद्वितीयन्मते मिथ्यात्वेन त्यध्याहारः स्यात् ज्ञा
नव्याभावेन निरस्तलक्षणत्वात् ज्ञानद्वयेपि [illegible] इति [illegible] अपि त्विति नहि घटपर

तीत्यादिके षष्ठी सर्वज्ञत्वादिगुणादिष्टव्याः एकैकमनवधिकातिशयाः कल्याणगुणगणाः असंख्येया इत्याद्य
ती नवधिकेति हेयप्रत्यनीकत्वमाह अपहतपाप्मेति अमगुणाः सर्वस्य ह्युपयोगित्वेन सकरणान्तरोक्ता व्या
ख्याताः सर्वे ति समाभ्यधिकनिर्देशो स्यांतदेक कारणत्वसिद्धिः सर्वावभासकत्वं च सर्वजगत्स्थित्युपयोगित्वे
न कारणत्वमपेक्षितं हेयप्रत्यनीकत्वं च सर्गोपक्रमयोग्यस्य हेयास्पदत्वे कर्मवश्यत्वे च स्वातंत्र्यादिभंग प्रसंगाद्
ते सर्वे तत्त्वस्य ज्ञावगताविहन्यंत इत्यर्थः अथ स्थादित्यादि उपक्रमशब्देनोपक्रमो [illegible] विवक्षितः तत्त्वमसी
ति वाक्यापेक्षया तदेकं हि चेति वाक्यस्योपक्रमत्वे येक विज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं तस्याप्युपक्रमभूत
ण मित्यभिप्रायः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुरोधेन कार्यस्यैव सत्यं प्रतिज्ञायेति एकविज्ञानेन सर्ववि- तां
ज्ञानप्रतिज्ञायाः कारणस्यैव सत्यत्वं फलितमित्यर्थः [illegible] कारणस्यैव स
त्यत्वं दृष्टान्तवाक्यैकंठोक्तमित्याह तस्येति द्रष्टान्तिकवाक्येपि निर्विशेषत्वमुक्तमित्याह सन्मूलत्वेपि नि
खिलभेदशब्देन स्वगतभेदो विवक्षितः विसजातीयभेदानंतर्गतत्वात्स्वगतभेदस्य शोधकवाक्यानामपि
निर्विशेषपरत्वमाह एतदिति एतच्छोधकानि कारणवाक्यावगतशोधकत्वात्तदेकार्थ्येन निर्विशेषपरा

णीत्यर्थः सामानाधिकरण्यस्याभावान्निर्गुणमित्यादिशोधकवाक्यान्तरैकार्थ्याच्च सत्यं ज्ञानं विज्ञानमा-

श्री

11

शंकायामाह अथमर्थः इति प्रतिज्ञावाक्योपक्रमभूतं तत्त्वमसीति वाक्यमारभ्य व्याख्यातुं तत्त्वमसी
तिश्रूयमाणमध्यमपुरुषस्वारस्यार्थमाह स्वेतकेतुं प्रत्याहेति तत्त्वमसीत्यादि श्रुतिवाक्योपादानं च
च वाक्ये तत्त्वमसीत्यस्यार्थमाह परिपूर्ण इव लक्ष्यस इति इष्टः तिधातुर्द्विकर्मकः वक्तृकर्मको
वाच्यकर्मकश्चेति तत्राद्ये शशाशासिनिहितं वाच्यकर्मेति दर्शयितुं नानाचार्येति वक्तृकर्मत्वमाह त्वं
न वै नूनं भगवंतस्त एतदवेदिषुः यद्ध्येतदवेदिष्यन् कथं मे नावक्ष्यन्निति तत्र इति निर्दिष्टा
आचार्या अस्मादिताः तानि निवक्तुं वचनेन तमादेशमिति तत्र इष्टस्याचार्यविषयत्वशंकामुदा
सः तमपीति श्रोतुर्दुर्लभत्वमित्यपि शब्दाभिप्रायः कर्माहि श्रोतव्यान्तर समुच्चयो वाभिप्रेतः इति
स्वेतकेतुं प्रत्याये त्यन्वयः आदेशशब्दं व्याचष्टे आदिश्यत इत्यादिना आदिश्यते नेनेत्यादेश
इति प्रत्ययार्थं व्याख्यातं आदेशः प्रशासनं इति पक्षस्यार्थं व्याख्यानं तत्राकर्तरि च कारके संज्ञाया
मिति घञ् करिष्यति रिक्तकारके विहितत्वाद्बहुलग्रहणात् प्रशासने कर्तृत्वादुपदेशकर्मत्वोपपत्तेश्च
तस्यार्थमुपदेशः प्रत्ययार्थः कर्मेति परे व्याख्यातं तत्र प्रकृत्यर्थास्वारस्यं प्रत्ययार्थे स्वारस्यं अस्मा
त्पक्षे प्रकृत्यर्थस्वारस्यं प्रत्ययार्थे स्वारस्यं कर्त्रभिन्नकारकत्वविषयस्य अनः कथं कर्तृत्वं शिव

योः सत्यत्वेपि घटज्ञानेन पटो ज्ञातो भवति तथा रज्ज्वर्थमाह सर्वस्य तादात्म्येनैव सत्यत्वदृष्टि अज्ञातत्वेनैव स
त्यत्वहत्यर्थः नहि कारणावस्थाज्ञानेन कार्यावस्था ज्ञाता भवतीति चेन्न उभयेन हि विशेषणतया वि-
शिष्टाकारेण विशेषणतानन्वयः अपि त्वेकस्मिन् धर्मिणि विशेषणतयान्वयोपि वक्तव्यः तस्मान्न विज्ञात
त्वविशिष्टाकारेण सर्वत्वं सर्वत्वविशिष्टाकारेण ज्ञाततावाचि किंतु सर्वत्वं ज्ञातत्वे चैकाश्रयवृत्तिकं अवस्था
११ नागमेपि धर्मिक्येन ज्ञाततया प्रयोगो मुख्य एव दृष्टः सोयं देवदत्तः पूर्वमेवायं मया ज्ञात इत्यादिषु न
हि तत्र वर्त्तमानकालविशिष्टत्वेन पूर्वं ज्ञातः तस्मात्परिमदृशेनेनामीषु दृष्टान्तेषु इति षदिद मप्युपक्रमं
एकस्य सत्यत्व ज्ञानेन तद्व्यतिरिक्तं मिथ्यात्वेन ज्ञातं भवतीति चेन्न येनाश्रुतं श्रुतं भवतीत्यादिषु वाक्ये
षु मिथ्यात्वेनेत्यध्याहारः एकविज्ञानस्य सर्वविज्ञानस्य चैवेरूपं अमुख्यत्वं च ज्ञानभावात् नहि
सर्वं मिथ्यात्वेन जानन् कश्चिद्ज्ञातास्ति तस्मात्सर्वविज्ञानश्रुतेः न सर्वज्ञाननिवृत्तित्वं कार्यस्यादि-
ति एकविज्ञानेन सर्वविज्ञानश्रुति ज्ञावाक्यं किं तादात्म्येनैव सत्यत्वं कथयति तथा सति कथं प्रतिज्ञोप
पत्तिः उपक्रमवाक्यं सत्यत्वकथनानुगुणं तदुपसंहारापेक्षया प्रबलं न तु महावाक्यस्वारस्यापेक्षया

महावाक्यं च मिथ्यात्वकथनानुगुणं तत्त्वमसि श्वेतकेतो इत्येव सत्यं सदेवैकमेवेत्यादिषु तथा ज्ञातेति रिति

ण समादेशाच्छास्त्रस्थः अथ तन्नेच्छं च विष्टएवन वाक्यार्थं योजयति अत इति येन विज्ञातं भवति
तं दृष्टवा नास्तीत्यन्वयः येन च्छक्तेन मतेन विज्ञातेन त्यथाहारेण योजनायाः को हेतुः न हि भूषणेन सन्नया
कृत्स्नं ज्ञातं भवति। अपि तु तज्ज्ञानेनैव ज्ञातं भवतीति वक्तृसामर्थ्यात् किंच दृष्टान्तेऽपि न हि घटस्य ज्ञान
ण घटादि ज्ञातं भवति अपि तु तज्ज्ञानेनैवेति वक्तृसामर्थ्यात्। किंच श्रुतावपि स्वल्पेन दृष्टेन्ते मते
१२ विज्ञाते इदं सर्वं विज्ञातं स्यात् कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीत्यादि श्रुत्या च एवं
दृष्टान्तसामर्थ्याद्दार्ष्टान्तिकसामर्थ्यात् अनन्तरं कोऽगोऽस्याचैवं माभ्यात्तं प्रत्युक्तं स्यादिति केठोत्या
च्छान्दोग्ये त्वत्रायमेवार्थः अन्तर्भूतः इत्यभिप्रायः ननु तस्मिन्नाके उपादानत्वेन कथं केवलं किंतु
फलितं कारणत्वं ज्ञानत्वं च न कथं केवलं अत्र जगत्कारणत्वाद् अभिप्राय स्यात् किं प्रयोजनमित्यपेक्षाया
माह निखिलजगदिति अनन्तरे श्रुयतो वाचारम्भणं नामधेयमित्यादि वाक्ये श्रुतजगत्कारणत्वेन दृढं एकं ब्रह्म वा
च्यं तस्माद्ब्रह्म जगत्कारणत्वगर्भं वदन्तः पितुस्तथा किं ब्रह्मणः अनन्त निखिल अभिप्रायः स्यादर्थः अन्वय इति
पुत्रोक्तिस्तदुक्तिपूर्वक श्रवणाभिप्रायेणोत्पादय वा नाहं तथास्तु भिन्नीति नाहं ब्रह्म विकं
तस्माज्जगत्कारणत्वं न भी वेद योजनं ब्रह्मश्रवणमुक्तः इत्यतो भवति सर्वज्ञत्वादिगुणाः कार

स्यात्ः कारकाणि भवंतीति न्यायेन कर्तुरेव कारणांतरनिरपेक्षं बलं स्यात् न करणसाधर्म्यरूपेण साध
कतमत्वेन करणत्वविवक्षया घञ् प्रत्यय उपपद्यत इत्यतः अभिप्रायेण ह्यादि स्वपते नेनेत्युक्तं न त्वादिश्यतीः
ति विवक्षया कारकं स्वतंत्रत्वेन तत्कर्तरि विविधानस्य किं प्रयोजनं स्वतः प्राप्तत्वेन कर्तृत्वविवक्षया एव
स्य कर्तरि करणत्वविवक्षया घञः कर्त्रर्थत्वमस्वारस्यविधिविभागः प्रयोजनं सूत्रस्य प्रयोजनत्वेऽपि स्वा
रस्यमस्वारस्यं च तुल्यं चेत् किमनेन योजनान्तरेणेति चेन्न उच्यते परपक्षे प्रत्ययार्थस्यैव स्वारस्यं अस्मत्
पक्षे तु स्वारस्यद्वयम् । इति अर्थस्वारस्यं शास्त्रस्वारस्यं चेति प्रकृत्यर्थस्वारस्यं बलात् सिद्धं विवक्षितविशे
षस्य साधारणाकारविधानं च स्वतः प्राप्ते सर्वत्र शासितृत्वं उक्तसाधारणधर्मउपदेश्यत्वं तु कर्मस्थ
पादेः साधारणं किं वा पेक्षितविविधेरनपेक्षितविधानं तु बलमिति न्यायात् अवश्यापेक्षितप्रशासितृत्व
ज्ञापनमेवयुक्तं नानपेक्षितमुपदेश्यत्वज्ञापनं तस्मात् कष्टस्वारस्यमर्थस्वारस्यं चेति स्वारस्यद्वयसंभवात्
यमेवार्थः ब्रह्मणः कृत्स्नप्रशासितृत्वे सिद्धे हि तत्र साधारणाकारतया वक्तव्ये तत्र किं प्रमाणमित्य
त्राह एतस्य वा इति स्मृतिमाह प्रशासितारमिति न केवलं श्रुत्यंतरेष्वेव प्रशासितृत्वं सिद्धं अस्मिन्नपि
करणेऽपि सिद्धमित्याह अन्तर्यामीति अधिदैवतं च विहितं तत्र प्रशासितृत्वमिति चित्तस्फोटेत्यभिसर्गः

र. सू. ले. ।विवक्षितविशेषकं तोक्तिमक्तुर्वेनुसामान्येनचोदयतीत्यर्थः वाक्यमुपादत्ते कथंचिदिति अथापि
नाब्रह्मणो जगत्कारणत्वं ब्रुवद्भ्यो गिगुणजातं श्रुत्याख्यानत्वनिमित्तत्वप्रयुक्तदोषशंकापरिहारं च
विवक्षितं कारणज्ञाने नकार्यविज्ञानं कस्मिंश्चिद्दर्शयतीत्याह परिचोदितः पुनरित्यादिना ज्ञा
23 नानंदामलत्वैकस्वरूपमिति विज्ञानमानंदं ब्रह्मेत्यादिशोधकवाक्यार्थो विवक्षितः स्वरूपशब्दो
धर्मिस्वरूपनिरूपकधर्मवाचि अपरिच्छेद्यमाहात्म्यमित्यनेनानंतशब्दार्थो विवक्षितः स्वरू
त पमपरिच्छिन्नमित्यर्थः गुणान्वयं व्याख्यानं त्वमाह सत्यसंकल्पमिश्रेरिति । सत्यसहस्राणीमाह अवि
श कारस्वरूपमिति अत्र स्वरूपशब्दो विशेष्यपरः स्वमविकारत्वादिशब्देविशेषणोपरिहितः उपाद
नत्वादिप्रयुक्तविकारादिविमर्शं दर्शयति नामरूपेति सर्वस्य चिदचिद्वस्तुशरीरमित्येताव
हुत्वं भावनामरूपविभागानर्हसूक्ष्मदशापन्नात्मा नः अनेन उपादानत्वप्रयुक्तचोद्यं प
रिहृतं अथ निमित्तत्वप्रयुक्तचोद्यं परिहरति स्वलीलायाइति अवाप्तसमस्तकामस्यापि लीला
र्थं जगद्व्यापारउपपद्यत इत्यर्थः महायामरूपजगद्व्यापारस्य नलीलात्वमिति चेत्तत्राह स
संकल्पेनेति संकल्पमात्रसाध्यत्वात् नायासमात्र इत्यर्थः संकल्पेनेत्यस्य संपूर्णे नबुवन् ... लोकवशिष्टस्य

णत्वोपपत्तेरिति तयोक्ताः श्रुतिसूत्रोपसंवादीनां श्रुतेः सत्यकामत्वस्य कारणत्वोपयोगः हार्दभावः हृदि

तात्पर्य= निहितत्वं तत्संख्यमित्यर्थः कारणत्वे सत्येकविज्ञानं नोपपद्यते कारणात्कार्यस्य स्यान्तरत्वात् कार

णत्वं च नोपपद्यते तत्रास्मिति भगवानाहे यास्मरत्वप्रसंगाच् कारणत्वोपपत्तावप्येकविज्ञानेन स

र्वविज्ञानं नोपपद्यते नानाजातीयकार्याणां नानाजातीयकारणत्वदर्शनादित्यत आह तत्रैव समस्तनि

खिलकारणतया कार्यभूतमखिलं जगद्धि रात्वं भवतीत्यन्वयः कारणत्वात्कार्यस्यानन्यत्वमाहः का

रणमेवेति नानासंस्थानविशेषसंस्थितं संस्थानविशेषविशिष्टमित्यर्थः सत्समाश्रितवृत्तिहस्तकश्रुतिरी

त्याष्टेन ब्रह्मणो हेयास्पदत्वप्रसंगः परिहृतः निर्वेदाद्युपसंहाय वक्तव्यमर्थं स्वयमेव कथं वदतीत्य

त्याह पुत्रं श्वेतकेतुं पितेति पुत्रस्यातिरिक्तानां श्रुतक्ष्यामपि वेदाः पुत्रस्य पुत्रत्वमेव ब्रह्मोपदेशो

हेतुरिति श्लोकार्थः स्वपितुः पुत्रपितृस्नेहेनोद्दालकोहारिणि श्वेतकेतुं पुत्रमुवाच तं हि पितोवाचेति

श्रुतिवाक्यं स्मारितं श्रुत्वैनेतरवाक्यमिदं कथं नु भगवः स आदेश इति इदं किं ब्रह्मस्वरूपं उत चोद्यस्व

रूपमिति शंकायां चोद्यस्वरूपमिति व्याचष्टे तदेतदित्यादिना प्रतिवचनं तत्र कारे प्रश्नार्थो ज्ञायते प्रति

वचनेन यथा सोम्यैकेन इत्यादिना दृष्टान्तोपादानादिदं चोद्यस्वरूपमित्यभिप्रायः परिचोद्यतीति

कारणभूतवस्तुज्ञानन्यत्वेन जगतोऽनित्यसत्वमित्यर्थः

वेद्धुं सदेवेति श्रुत्योपादानं ... मिति जगन्निर्दिष्टमिति श्रुत्वं नमस्मिन्नेवेतत्परत्वे अन्यथा प्रत्यक्षादिप्रमा
णसिद्धजगत्परत्वमेवेदं शब्दस्याविदमिति भावः। अग्र इत्यादि अनंतरं सृष्टेर्वेद्यमाणव्यवहारगह्वरस्य सूत्र
यकालपरत्वमवगम्यत इति भावः तस्मिन्काले जगतः सदात्मकत्वं सदेवेति श्रुतिपाठेति सदेवेत्यनेन दे
शेषि कोऽर्थः कदाचित्सत्त्वं कदाचिदसत्त्वं व्यावृत्तं तेन प्रलयकालेऽपि सत्वं फलितमित्यवसृष्टं ननु च्यावनि
24 कोऽयमर्थः सदेवेदमग्र एकमेवासीदिति हि अन्वयः सम्यक्त्वः प्रमाणसंबंधाद्दोषाधिकाल्पत्वेन प्रत्यक्षविप्रलम्भकालवि-
शिष्टं ब्रह्माह कारणात्कार्यस्या...पत्वेन कदाचिज्जगतः सत्त्वेच यदि स्यात् तत्सृष्टिकालेऽपीति जगत्सदेव
चेत् प्रलयेऽपि कोऽविशेषः इत्यपेक्षायां इदं शब्देन ... मेवतत्स्याविभक्तनामरूपावस्था प्रलयः विभक्तनामरूपावस्था
कार्यत्वेति शेषमन्यमेकमेवेति पदेनोक्तं भवतीत्यर्थः अनेन ब्रह्मोपादानत्वं फलितमित्याह तत्र श्रुतिपादनेने-
वेति भागवत्स्याविशेषवतः प्राणवत्स्यायोगेऽप्युपादानत्वेन ... मायानवस्था यः पूर्वोक्तस्याभ्यः कथनेनोपादा फला
नत्वमुक्तं भवतीत्यर्थः कृत्स्नकार्यस्य ब्रह्मैवोपादानमस्त्येव तथाप्येकविज्ञानेन सर्वविज्ञानं नोपपद्यते निमि
त्तांतरसंभवादिति शंकायां तस्येश्वरनिमित्तत्वेन निमित्तांतरशंकामपहिनस्ति यद्वयं ... यतीत्याह स्वयमिति-
केति कुलालस्येव विविधपरिणाममप्राप्यैककलेनवोपादानत्वे प्रतिज्ञा... रहाद निमित्तत्वं ...

दृष्टं कार्यकारणयोरनन्यत्वं दर्शयितुं दृष्टान्तमाहेति कार्यकारणयोरनन्यत्वे दृष्टान्तमाहेत्यर्थः अ
न्यत्वनिबंधनचोद्यस्यानन्यत्वज्ञापनेन परिहारइति भावः दृष्टान्तवाक्यमुपादत्ते यथा सोम्यैकेन मृ
त्पिंडेनेति एककारणज्ञानेन कार्यविज्ञानस्य सिद्धये तयोरैक्योपपादकमुत्तरखंडं प्रथमं व्याचष्टे य
क्रमेणेति तत्र वाचेति पदं व्याचष्टे नानाव्यवहारास्पदत्वायेति वाक्छब्दोऽत्र अजहल्लक्षणया वाक्पूर्वकव्य
वहारे वर्तते वाक्पूर्वकव्यवहारस्य प्रयोजनतया हेतुरित्यर्थः विकारशब्दार्थमाह घटस्थालेत्यादिना
संस्थानमेवावस्थाभेदविकारः षोडशकश्च विकार इत्यादिषु विकारशब्दस्यावस्थावदवयवपरत्वेना
प्रयोगदर्शनाच्चावस्थावदर्थमवस्थारूपविकारस्तदुक्तं नामधेयपदं व्याचष्टे नानानामधेयमिति मृत्ति
केत्येव पदं व्याचष्टे मृत्तिकासंस्थानविशेषत्वादित्यादिना एवकारव्यावर्त्यमाह न च स्वतन्त्रमितीति ए
वं कारणज्ञानेन कार्यज्ञानस्योपपादकमुत्तरखंडं व्याख्याय तदुपपाद्यं पूर्वखंडं व्याचष्टे यथेति लोके
कारणज्ञानात्कार्यज्ञानं संभवतु न त्वेकविज्ञानेन सर्वविज्ञानं नोपपद्यते विजातीयकार्याणामेक
कारणकत्वायोगादिति तु भावः तत्रैककारणकत्वाज्ञानेन भवदेतद्भक्तमित्याह तत्र इत्यादिना विजातीयाना
मपि सर्वकार्याणां ब्रह्मैवोपादानं तदेव निमित्तमपि तु यदिदं दृष्ट्येत्याह ततः सर्वज्ञमिति उपदिष्टान्तु उप

उत्पत्तौ साधनस्य पूर्वभावित्वं साध्यस्य पश्चाद्भावित्वं संकल्पे तु साध्यं पूर्वं ज्ञात्वा साधनं पश्चाज्ज्ञायत इति तस्मा
त्स्यामिति पूर्वमुक्तं स्वयमेवात्मानमकुरुतेति तदेव संकल्पो ऽस्यार्थः स्वांशाः प्रकृतिः तेनोक्तं जसृष्टिवचनं विय
दादेरपि प्रदर्शनार्थमिति विमर्शाधिकरणसिद्धार्थमित्याशयेनाह वियदादिकमाख्यं महदादेरपि प्रदर्शना ना
र्थमित्युक्तं पुनरपीति त्रयमिति सृष्टार्थमित्यर्थः सैक्षतेति सदेवेत्यादौ निर्दिष्टो ऽयं संकल्पः। सेयं देवतेति सृ
15 णामुक्तत्वेति समापनवचनार्थमेवमुक्तं गततद्भेजः परस्यां देवतायामिति हि वक्ष्यते तस्य त्रयमि
ज्ञानायपराद्देवते युक्तं अत्र पूर्वापरेषु सगुणं ब्रह्मोच्यते इत्यर्थः व्यष्टिसृष्टिसंकल्पवाक्यमुपादत्ते
हंताहमिमा इति अनुप्रविश्य नामरूपे व्याकरवाणीत्यत्रानुप्रवेशो न केवलं तत्तत्पदार्थमात्रपर्यन्तनाम
रूपव्याकरणार्थः अपि तु स्वपर्यन्तनामरूपव्याकरणार्थः अनुप्रवेशश्रवणेन मातापितृकुलालादि
निर्दिष्टदेवदत्तघटादिनामरूपव्याकरणतो व्यावृत्त्यावगमात् वक्ष्यामिति उपक्रमवत् स्वपर्यन्त
नामरूपव्याकरणसंकल्पात् तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियतेति नामरूपयोर्व्यु
न स्वपर्यन्तत्वश्रवणाच्चानुप्रविश्य सच्च त्यच्चाभवदिति श्रवणाच्च व्यष्टिसृष्टिसंकल्पवाक्ये अनुप्रवेशपू
र्वकनामरूपव्याकरणोक्तिरायुक्तेरयम् ... महदहंकारादिनामरूपयोरपि स्वपर्यन्तत्वाच्च यस्य

रसज्ञा चाक्षुषैर्वेद्यत्वकारणमित्यर्थः उक्तार्थे सोपस्कमसंगतत्वमाह तमादेशमिति आदेशशब्देनेश्वरस्तत्व
कंठोक्तं येनाश्रुतं श्रुतमित्यादिना उपादानत्व मभिप्रेतं तद्वुक्तमथ मत्र स्फुटमित्यर्थः अत्रासत्कार्यवादिपक्ष
सन्निरासवाक्यं द्वितीयश्रेजनायाम्या ख्यास्यत इति नाशेदाह तं अथ तदनंतरवाक्ये श्रूरकपदांतरे सहो
पादत्ते स्वयमेवेति सदेवेति वाक्ये सजातीयविजातीयस्वगतभेद निषेधपरत्वेन योर्व्याख्यातं तत्तु तरवा
ख्यानमनुपपन्नं अस्मदुक्तार्थस्यैव उपपादकान्युत्तरवाक्यानीत्यभिप्रायेणाह जगदुपादानं जगन्निमित्तं सदिति
विशेषणद्वयोपादानं एतच्चावश्यं तदैक्षतेत्यादिना वाक्यमात्रा सर्वमुपपादकमिति विशेषणान्याह सर्वज्ञमि
त्यादिना अवाप्तसमस्तकामस्य इच्छानुपपत्तिं परिहरति अवाप्तसमस्तकामस्यापि लीलार्थमिति संकल्प
मात्रस्याध्यस्तानंतजगदाकार अध्यासरूपं इत्यभिप्रायेण संकल्पमित्युक्तं अजायमानो बहुधा विजायत इ
त्युक्त्या चेतनारूपबहुभवनस्याध्यासरूपत्वं जगद्रूपेणेत्युक्तं तत्र बहु स्यामित्यत्रैवेति द्वैविध्यं विचित्रानंतेत्याद्यु
क्तं बहु स्यामित्यर्थे प्रजायेयेति जायते इत्यादीव स्थाने सुजायमानाच्च स्याजातस्य चेत्युक्तस्यावस्थाद
यमस्तित्वं तथास्तिशब्दवाच्योत्पन्नावस्थायाः जायमानावस्थायाः इति शब्दवाच्या तत्र बहु स्यामिति वाक्ये
स्यामिति पदेनोत्पन्नावस्थाया विवक्षितत्वात् स्वरूपमाविष्टुं स्यामिमानावस्थानंतरं प्रजायेयेत्युक्तेति विभागः

न

ङा कृत्तद्धितसमासैरनभिहिते हि कारकं तृतीयविभक्त्याभिधेयं अत्र तु व्याकरणवाणीति तिङभिहि-
२६ तत्वान्न तृतीयाभिधेयः कर्त्ता नत्र प्रथमैव युक्तेति चेन्न व्याकरणकर्त्तोहीतिसमभिहितः अनुप्रवेशाकर्त्ता
त्वं नभिहितत्वादिति तृतीयाभिधेयः नामरूपव्याकरणानुप्रवेशक्रिययोः समासे कर्तृत्वकृत्वमनुप्रविश्येति क्त्वा
प्रत्ययेनाभिहितमिति न तृतीयाभिधेयः कर्त्तेति चेन्न कर्त्ताहि तत्त्वाभिधेयः अस्ति तु प्रत्ययान्तराभिधेयः
26 प्रत्ययान्तरश्रुतिप्रत्ययोः कर्त्रैक्यमेव क्त्वाप्रत्ययाभिधेयं यथा समानाधिकरणेषु राकोषु प्रतिपदिका
र्थानां विशिष्टार्थं विशेषैक्यमात्रं समानविभक्त्याभिधेयं न तु विशेष्यत्वात्त्वयोविशेष्यं वा एवमत्रापि क्त्वा
प्रत्ययोन कर्त्रभिधायी अपि तु शब्दान्तरश्रुतिप्रत्यक्रियाद्वयकर्त्रैक्यमात्राभिधायी क्त्वाप्रत्ययः एवं कर्त्रे
भिधायीति चेन्न व्याकरणाणीति तिङ्प्रत्ययोनिरर्थकः स्यात् तस्माच्छब्दान्तरश्रुतिप्रत्ययक्रियाद्वयकर्त्रै
क्यमात्राभिधायी क्त्वाप्रत्यय इत्यनुप्रवेशक्रियाकर्त्ता तृतीयाभिधेयः एवं कर्त्तरि कृदिति कृत्यप्रत्य
यानां कर्त्तरि विहितत्वात् कृत्संज्ञकः क्त्वाप्रत्ययः कर्त्रभिधायीति चेन्न अर्थविशेषविहितानामेव
कृत्प्रत्ययानां कर्त्रर्थत्वं न तु अर्थान्तरे विहितानां चव्यादीनां कर्माद्यर्थे विहितत्वात् अयं तु क्त्वाप्रत्य
योभावे विहित इति न कर्त्रभिधायी तस्मात् तृतीययाकर्त्ताभिधीयत इति निरवद्यं अनेनेत्यादि

विहितः तथापि कारात् प्रातिपदिकार्थमात्रे प्रथमाविभक्तिः तथा धात्वर्थमात्रे विहितो यत्प्रत्ययः भावार्थः अयं तु क्त्वाप्रत्ययो भावे १

बुद्धिशरीरं यस्याहंकारशरीरं यस्याहंकारशरीरमिति हि श्रूयते अन्तरावशक्तिं पुरुषं चैव शक्तिरूपाभेद
याहरिः सोमयामास संज्ञासै सर्गकाले यथा यथा चिन्तितस्मृतं एवं व्यष्टिसमष्टिसंकल्पवाक्येपि नामरूपव्या
करणयोर्ब्रह्मपर्यन्तत्वं च चिदचिद्विशिष्टमात्मसृष्टिसंकल्पवाक्यानुरोधाज्ज्ञेयमिति श्रुतसंतरानुगुण्यात् तदनु
प्रविश्य सच्च त्यच्चाभवदित्यनुप्रवेशपूर्वकत्वश्रवणपर्यन्तनामरूपव्याकरणं कंठोक्तं श्रवगम्यते वक्तव्यमि
त्युक्तं नानानामरूपभाक्त्वं मृत्पिंडस्य घटादिनामरूपभाक्त्ववत् किंप्रकारकं जीवस्य देवादिनामरूपभा
क्त्ववत् किंप्रकारकमिति संशये अनेन जीवेनेत्यादिश्रुतिः प्रकारकमाह ब्रह्मणि समष्टिनामरूपभा
क्त्वप्रकारकं महदादेर्जीवं प्रतिशरीरत्वाभावात् व्यष्टिनामरूपभाक्त्वप्रकारकं सप्रकारकं च तथा सति तस्
द्धिपर्यवसानहेतुस्तागोशाश्वादिवच्च अनेन जीवेनात्मना जीवशरीरकेण मयात्मिं नम्बुद्धयावरूपेणमया पे
हं ʺसारचितचत् तदनुप्रविश्य सच्च त्यच्चाभवदिति जीवेनानुप्रवेशे नतन्नामभाक्त्वश्रवणाच्च जीवेनात्मनेति
तृतीयायाः कोर्थः न तावत्सहयोगलक्षणा येन तृतीया कारकविभक्तिसंभवे उपपदविभक्तेरन्याय्यत्वा
दिति न्यायेनोपपदविभक्तेरनुपपत्तेः नापि करणे तृतीया अनुप्रवेशं प्रति जीवस्य करणत्वाभावात् अनु
प्रवेशप्रकारकतो हि स जीवशरीरस्य परमात्मपर्यन्तत्वात् येन कारणेन तृतीया तस्मात्कर्तरि तृतीया ति

नि मूला नां शालिनः श्रीहास्त्या दिभिर्लीष्ठा कामादे जीवाधिष्ठितत्वश्चरणात्कार्हं त्रिलेत्यायकं भि
७ नेऽस्तु मोहि कार्हं वज्रुमा वस्था छिद्यान्तजीवा प्रगर्भेऽपि कार्यावस्थाभिमानि जीवो विद्यत एव नामरूप
मात्स्कारितिभावः तत्रसंस्थानवत्कस्तुरवेनैतेन न परमात्मा निदेवत्व मनुष्यत्वादित्वाद्यनुपपत्तिः
यदि हत नाम वति देवत्वादित्वादीनां परमात्मस्वरूपे ऽन्त्य व्यानेनान्वयाभावेऽपि देवत्वादीनां श्रुक्त्व
17 भिधेयानां अव्ययाभिधेयानां द्वित्वादीनां च परमात्मनि सद्भावकान्वयो भवतीत्यर्थः अत एव कण्ठत्वा
यानस्योऽभिमन्नैत्यादिरूपपपत्त्येदेवोऽहं भवतीत्यन्वयः अथ त्रिवृत्करणादिवाक्यानां प्रस्कता
र्थानपेक्षत्वेन तानि विहाय यापेक्षितवाक्यानामर्थसंग्रहेणाह एवमित्यादिना नामरूपव्याकरण
र्थं हि त्रिवृत्करणं तस्मात्त्रिवृत्करणसाध्यनामरूपव्याकरणसंकल्पवाक्ये पूर्वभाव्यनूद्य उत्पत्तिवा
क्येऽनु त्रिवृत्करणस्य पूर्वभावित्वं युक्तं पाठक्रमेण त्रिवृत्करणस्य पश्चाद्भाविलेप्यर्थक्रमेण पाठक्र
मस्य बाधत्वात्त्रिवृत्करणं पूर्वभावि यथाग्निहोत्रं जुहोति यवागूं पचतीत्यत्र च यवागूपाकः पूर्व
भावित्वं पाठक्रमबाधेनांगीक्रियते यवाग्वा जुहोतीति यवाग्वा होमसाधनत्वाविहितत्वात् तद्वद
त्रापि क्रमोऽनुसंधेयः सन्मूलाः सोम्येमाः प्रजा इत्यादिवाक्यस्यार्थमाह एवमिति सद्व्युपादानत्वात् सन्निमित्तत्वा

वाक्यं संक्षेपेण योजयति अनेनेत्यादिना पदार्थत्वं नाम तदवस्थाविशिष्टत्वं देवमनुष्याकारविशिष्टत्वे
न हि निराकारः पदार्थः पृथिवीत्वाकारविशिष्टो हि पृथिवीपदार्थः परमात्मपर्यन्तत्वे च तत्तच्छब्दानां तदव
स्थाविशिष्टत्वं न स्वतन्त्रं शेषत्वमर्थः तत्पर्यन्तत्वं देवादिनाम्नां कं चेत्याह एवंभूतस्यैव चिन्मृदात्मको घटश्चि म
च ब्रह्मात्मकत्वं स्वरूपैक्योपपद्यते शरीरशरीरभावेन तादात्म्यं मुख्यवृत्त्यासति किं प्रयोजने स चेत्स
ष्टानां परमात्मपर्यन्तत्वं चेत् परमात्मनि देवत्वमनुष्यत्वादेः प्रकृत्यर्थस्य हि त्वादेर्विना कथं समन्वयोग्या
न्तत्वं पर्यन्तत्वमुपपद्यत इति शंकायां विस्तरेण वाक्यार्थमाह एतदुक्तं भवतीत्यादिना शरीरत्वमप्य
न्न किं ब्रह्मपर्यन्ताभिधानस्येत्याह प्रकारत्वादिति प्रकारत्वं दण्डकुण्डलादेरप्यस्तीति तन्मात्रस्यैव शा
क रीरतया प्रकारत्वादित्युक्तं एवं ब्रह्मात्मत्वं शरीरशरीरिभावादित्युक्तं आत्मशब्दः स्वरूपैकशरीर
शरीरिभावे च साधारणः अतः शरीरशरीरिभाव एवेति किं नियामकमित्यपेक्षायामाह यस्येति जीवा
त्मा ब्रह्मणः शरीरमस्त्विति च किमित्यत्राह एवंभूतस्येति देवत्वादिविशिष्टशरीराणि जीवस्वरूपाणि ब्रह्मात्म
कानीत्यर्थः तत्र किमित्यत्राह अत इति देवादयस्तज्जातीयानामपि ब्रह्मपर्यन्तत्वे दर्शयितुं यदृच्छ
मादृष्टपर्याः अथापि तमसुत्वत्पाततो हि श्रोतारः धराधिनेयत्वं जानीहि विज्ञानप्रिये जृम्भिता

त्वंग्राह्यत्वगतजीवस्य तद्ग्राह्यत्वगतस्य ब्रह्मणश्च सामान्याधिकरण्येन उक्तिप्राप्त्यामेकं तत्त्वमेकत्वमेवम
१८ घटतामिति परिहारस्तु ऐतदात्म्यमिति सर्वस्य ब्रह्मात्मकत्वस्य शास्त्रार्थत्वात्तदुपसंहार्यत्वात्त सामानाधिकरण्ये नोक्त
स्य विरोधस्योपसंहारस्यापेक्षितत्वाच्च जीवविशेषस्य सर्वात्मकब्रह्मात्मकत्वं सामानाधिकरण्येनोपसंहृतमिति ऐ
तदात्म्यमित्यत्र ह्यात्मशब्दो महदात्मकोऽयमिति तत्त्वस्वरूपैक्यपरः स्यात् तेन तत्त्वमसीत्युपसंहारेऽपि स्वरूपैक्य
मेवोक्तं भवति ऐतदात्म्यमिदं सर्वमित्यत्राऽपि ब्रह्मणोरैक्यं तत्त्वमसीति जीवब्रह्मणोरैक्यं चोक्तमिति नाशनुषा
दऽत्रेति शंकाद्वयमपि वेत्याह एतत्तु कथं भवतीति चेतनाचेतनप्रपंचमिथ्यात्ववादिनापि ब्रह्मणोरैक्यं शक्तिपादितमिति
प्रत्युक्तं सर्वज्ञाद्यभिहितसंकोचेन सर्वाणां चराचराणां सर्वचेतनाचेतनात्मकं जगदेतदीयचिन्मात्रपरत्वेऽस्मारस्य संगात ८
श्रुत्यन्तरे च यदिदं सर्वं मसृजत यदिदं किंच तत्सत्यमभवत् विज्ञानं चाविज्ञानं चेति इदं सर्वमिति निर्दिष्टस्य जगतश्चेत
नात्मकत्वेन चित्तत्वाच्च ऐतदात्म्यमित्यत्र किमुद्देश्यमित्यत्राह प्रपंचोद्देशेनेति एवमेकात्म्यपरिहृताच्छ्रुत्या
स्मात्सत्यस्वरूपैक्यपरत्वं तु तदस्य तिष्ठतीति मित्यादिना स्वरूपेणैवेति श्रुतिद्वयेणोः स्वरूपैक्यश्रवणेनत्या
देवसत्यसंकल्पत्वादिविरोधः जीवब्रह्मणोरैक्ये तस्य कर्मवश्यत्वादेवं सत्यसंकल्पत्वादिविरोधः स्यात् एतद
शेषपरिहाराय तत्रोपासनमात्रं कल्पनेत्यर्थः न केवलमनयाऽन्यथाप्युपपत्त्या कल्प्यं अपितु ब्रह्मणः आत्मत्वं

किमुपादेय४.

शृष्टेन सन्मूला इत्यत्र मूलशब्दार्थ उक्तः सदायतनशब्दार्थमाह सदाधारास्तेसि नियंतृत्वधारकत्वाधार
कत्वाकृष्टमर्थमाह सन्नियाम्येति अनेनसो यत्नमप्यर्थसिद्धं शरीरतया शरीरत्वं हि शेषत्वं नियाम्यत्वं च
तदप्याह तच्छेषत्वादीति आदिशब्देनानुक्तमविवक्षमन्यत्राप्रतिन्यायाद्यदर्शयेदिति संगृह्यते कार्य
कारणभावादिसूत्रेत्विनेत्यादिशब्देन सर्वस्य रूपकत्वादिकं विवक्षितं तेन ब्रह्मात्मकत्वमेव सत्यमिति दर्शि
यष्येति धारकत्वादिनि स्वाच्छरीरत्वभावः सिद्धः कार्यकारणभावश्च सिध्यति सुरूपमात्रस्य कारणत्वा
योगेन विशिष्टस्यैव कारणत्वात् ब्रह्मात्मकत्वमेवैतेष्वेवकारेण स्वपृथक्त्वं वाशात्रिकमित्युक्तं भवति ऐ
तदात्म्यमिदं सर्वमिति वाक्यार्थमनूद्य संबंधार्थं ऐतदात्म्यसंबंधीत्यर्थः अस्यात्मनः शरीरतया संबंधीत्युक्तं भ
वति ऐतदात्म्यमिदं सर्वमित्यस्य आत्मेति निर्देशो रामानुजं लक्षणाद्बेधे चेति वक्तव्यः आत्मशब्देन फलि
तार्थमाह कृत्स्नं जगत्तस्य शरीरमिति अस्यार्थस्पितेषु सर्वेष्वपि तत्त्वप्रतियोगिनः पुत्रत्वाद्युर्थसिद्धं भवति
तस्मादित्यादिनैतदात्म्यमिति सामान्येन वैयधिकरण्येन प्रतिज्ञातं ब्रह्मात्मकत्वं तत्त्वमसीति सामाना
धिकरण्येन जीवविशेषे उपसंहरति तदर्थः अनेनोद्देश्योपादेयविभागनिमित्तं चोद्यं परिहृतं भवति उद्दे
न श्योपादेयविभागे सति तं श्राहृ उद्देश्यसमर्पकोऽस्ति न वदि तत्सद्भावगतकारणत्वस्य प्रमाणान्तरासिद्धत्वात्
तं श्राहृत्सतो लोकशसिद्धकारणोपादेयसमर्पकः जीवस्य ब्रह्मात्मकत्वं च न प्रत्यक्षादिप्रमाणप्रसिद्धं तस्माज्जीवमात्रपरत्वं
शास्त्रः

ब्रह्मपर्यंतव्युत्पत्तिसमर्थीने

न तत्त्वमुक्तिपदस्य प्रवृत्तिनिमित्तभेदसिद्धिमाह तत्त्वं ज्ञात्वेति तत्त्वं कार्थपरोस्यातां ततः किमित्यत्राह

५. तदेवमिति प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वरूपं सामानाधिकरण्यं सिद्धमित्यर्थः तन्मतेसामानाधि

करण्यलक्षणासिद्धिः वाक्यान्तरावगतसर्वज्ञत्वादिगुणविशिष्टसच्छाश्रयतादिकल्पनीयं वेत्यभिप्राये

णाह ब्रह्मणइति सर्वपदार्थाश्चाश्रय ब्रह्मपर्यन्ताश्चेत ब्रह्मपर्यन्तसमाप्तपदार्थाः स्वीयेरन् आश्रय

४३ तत्पर्ये ततया व्युत्पाद्येरन् न च तथा क्रियते तस्मान्नामरूपयोर्ब्रह्मपर्यन्तत्वमयुक्तमित्यत्राह अयु

क्तेति पदार्थानां ब्रह्मपर्यन्तत्वस्य ग्रहणाभावे वेदान्तश्रवणरूपसामग्रीवैकल्यात् तत्त्वार्थाभावात् स्थित्य त

र्थः सर्वशास्त्राणां चेति तस्मादेव सामग्रीवैकल्यात् दृष्टानां तत्पर्यन्तव्युत्पत्त्यभावइत्यर्थः नहि चक्षुर्गां

गंधग्रहणाभावे सन्निहितगंधाभावइत्यर्थः सामग्र्या सत्त्वात् तत्पर्यन्त ग्रहणात् पूर्वं तत्पदार्थमात्रपर्यन्त

ग्रहणं सामग्रीवैकल्यात् घ्राणेनगंधग्रहणेसन्निहितकमगंधग्रहणाभावः सामग्र्यभावात् नन्वगंधा

भावादित्यवगम्यते हीत्याह इदानीमिति इदानींवेदान्तश्रवणरूपसामग्रीसंभवे वेदान्तवाक्यानि तत्त्व

पदार्थेतत्त दृष्टानां ब्रह्मपर्यन्तत्वं बोधयितुं तत्र शक्नुवन्तीति बोधयन्ति न च्छिन्ति वेदान्तवाक्यानि किं व्यु

त्पत्तिनिरपेक्षाणि उत सापेक्षाणि व्युत्पत्तिनिरपेक्षाणि चेत् अव्युत्पन्नस्यापि बोधजनकानि स्युः सा

सापेक्षत्वे तथा

जगतस्तच्छरीरत्वं च कथमित्यत आह शरीरात्मभावेन चेदिति कार्यतः फलितः तत्र विशेषणतो व्याप्तिः कथमिति
शेषकार्यांश इति वाक्यमाह अंतरिति अत्र वाक्ये विशेषणतो व्याप्तिं दर्शयति प्रशासितृत्वेति सर्वात्मत्वमात्मत्वं
प्रशासितृत्वलक्षणमिति दर्शयितुं प्रशासितृत्वरूपात्मत्वेनेत्युक्तं अंतःप्रविष्टः शास्ता जनानामित्यादि श्रुतिः शास्तेति
पदेन गगनादिव्यावृत्तिः अंतःप्रविश्य प्रशासितृत्वादित्यर्थः कथं विशेषणतो व्याप्तमित्यपेक्षायामेवं विशेषणतो व्या-
प्तत्वस्योक्तमिति निष्पन्नफलितः अस्मिन् वाक्ये प्रशासितृत्वविशेषितात्मत्वरूपत्वस्य कंठोक्तिः शरीरत्वं यस्य आ-
त्मत्वशरीरत्वकंठोक्तत्वं तद्वाक्यमाह यस्यात्मनीति शरीरशरीरिभावः अत्यंतप्रसिद्धः स्यात् तथा चैतत्स-
करोक्तत्वे कः गमकः इत्यत आह अत्रापीति अतः किं सामानाधिकरण्यसिद्धिरित्यत आह अत इति सामानाधि-
करण्येनोपसंहारे किं प्रयोजनमित्यत आह एवमपि हि तत्सर्वातीति बुद्धिशब्दयोस्तत्पर्यंततात्पर्येण प्रयोजनमि-
त्यर्थः परमात्मशरीरतया परमात्मप्रकारभूतः परमात्मपर्यंततदुक्तिः शरीरतया प्रकारत्वेन पृथक्सिद्धि-
र्भिन्नमिति प्रकृत्य नहीत्यर्थः बुद्धिशब्दयोस्तत्पर्यंतत्वे हेतुमाह अनेनेति स्वनामरूपाकारं तदंतर्यामिणमेवाच-
ष्टे इत्यन्वयः परं ब्रह्मेति वदता प्रमाणानां स्वपक्षोपस्थितिं दर्शयितुं स्वपदे सामानाधिकरण्यानुगुण्यं
